# Rishikashyapaproktam Bhasmamahatmyam

# ઋષિકશ્યપપ્રોક્તં ભસ્મમાહાત્મ્યમ્

## Document Information

Text title : Rishikashyapaproktam Bhasmamahatmyam

File name : RRiShikashyapaproktaMbhasmamAhAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 11 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં ભસ્મમાહાત્મ્યમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

કાશ્યપ ઉવાચ ।

ભસ્મનઃ પઞ્ચનામાનિ શ્રુતિગીતાનિ વૈ દ્વિજ ।
વિભૂતિર્ભસિતં ભસ્મ ક્ષારં રક્ષેતિ ચ ક્રમાત્ ॥ ૧॥

ભાસકજ્ઞાનદાનેન ભસ્મૈતત્કીર્તિતં સદા ।
ઐશ્વર્યદાનાત્સા ભૂતિર્ભસિતં પાપનાશનાત્ ॥ ૨॥

ક્ષારં રક્ષા ચ વૈ પાપક્ષરણાદ્રક્ષણાત્તથા ।
જાબાલૈર્નિતરામુક્તં ભસ્મ પાપભયાપહમ્ ॥ ૩॥

ભસ્મ મુક્તિપ્રદત્વાચ્ચ પ્રસાદકરણં મહત્ ।
યો ભસ્મરહિતો વિપ્રઃ સ એવ શ્વપચોઽન્ત્યજઃ ॥ ૪॥

સ નિત્યસૂતકી ભૂયાદ્ભસ્મધારણવર્જિતઃ ।
તેનાધીતં તથૈવેષ્ટં જપ્તં સર્વં ચ નિષ્ફલમ્ ॥ ૫॥

આમનન્તિ સદા ભસ્મ શ્વેતાશ્વતર શાખિનઃ ।
આમનન્તિ સદા ભસ્મ અથર્વશિરસિ સ્થિતાઃ ॥ ૬॥

આમનન્તિ સદા ભસ્મ બૃહજ્જાબાલશાખિનઃ ।
શ્રુતયો ભસ્મમાહાત્મ્યં વદન્તિ બહુધા દ્વિજ ॥ ૭॥

મુનયો બ્રહ્મવિષ્ણ્વાદ્યા ભસ્મમાહાત્મ્યવેદિનઃ ।
દેવૈઃ સદૈવ સુધૃતં ભસ્મેદં પાવનં પરમ્ ॥ ૮॥

બ્રહ્મણા વિષ્ણુનેન્દ્રેણ ધૃતં રુદ્રૈઃ સદૈવ હિ ।
દેવસ્ત્રીભિર્ધૃતં ભસ્મ સર્વદા તત્ ત્રિપુણ્ડ્રવત્ ॥ ૯॥

દેવ્યા ચ ગણપેનૈવ સ્કન્દેન ચ ધૃતં પરં ।
સ્ત્રીભિર્ધાર્યમિદં ભસ્મ મઙ્ગલં તદ્ભ્રુવોઽન્તરા ॥ ૧૦॥

સભર્તૃકાભિઃ સતતં શિવારાધનસાધનમ્ ।
જ્ઞાનાઙ્ગત્વેન કથિતં સર્વદા પાવનં પરમ્ ॥ ૧૧॥

શિવપ્રસાદજનકં ભસ્મધારણમુત્તમમ્ ।
શિવપ્રસાદજનકં ત્રિપુણ્ડ્રપરિધારણમ્ ॥ ૧૫॥

શિરોલલાટવક્ષસ્સુદોર્દ્વયે યસ્ત્રિપુણ્ડ્રધૃક્ ।
સ એવ પ્રિયકૃચ્છ્રેષ્ઠો મહેશસ્ય ગણેશ્વરઃ ॥ ૧૬॥

ભસ્મના પૂતભાલો યઃ સ તપસ્વી સ તુ દ્વિજઃ ।
સ એવ પ્રેમસદનં મદનાન્તકરસ્ય ચ ॥ ૧૮॥

ભસ્મધૃક્ પૂયતે પાપૈર્મહદ્ભિરપિ કૃત્સ્નશઃ ।
ભસ્મભાલં ત્રિપુણ્ડ્રાઙ્કં દૃષ્ટ્વા ભીતો યમઃ સદા ॥ ૧૯॥

નૃગણાશ્ચ પિશાચાશ્ચ ગ્રહાશ્ચૈવ વિનાયકાઃ ।
તં નરં નોપસર્પન્તિ સર્વદા ભસ્મધારિણમ્ ॥ ૨૦॥

ભસ્મધારણમાત્રેણ સદા શામ્યન્તિ વે ગ્રહાઃ ।
પઞ્ચાક્ષરેણ યો ભસ્મ અભિમન્ત્ર્યૈવ ધારયેત્ ॥ ૨૧॥

આર્દ્રૈઃ શુષ્કૈસ્તથા પાપૈર્મુચ્યતે નાત્ર સંશયઃ ।
ભસ્મૈવ પરમં તૂર્યં પાવનં જ્ઞાનભાસકમ્ ॥ ૨૨॥

યો વિનિન્દતિ ભસ્મેદં સ નિન્દ્યાં યોનિમાપ્નુયાત્ ।
ભસ્મયુક્તં ત્રિપુણ્ડ્રાઙ્કં ભોજયિત્વા તુ શામ્ભવમ્ ॥ ૨૩॥

સ ભોજયતિ ગૌરીશં તેન તુષ્ટો મહેશ્વરઃ ।
પવિત્રાણાં પવિત્રં હિ ભસ્મૈવ દ્વિજપુઙ્ગવ ॥ ૨૪॥

ન ભસ્માત્ (ભસ્મનઃ) પાવનતરં ત્રિષુ લોકેષુ વિદ્યતે ।
ન ભૂત્યા(યૈ) પ્રમદેતૈવ ઇતિ શ્રુત્યનુશાસનમ્ ॥ ૨૫॥

ભસ્મના પૂજયેલ્લિઙ્ગઙ્ગં ત્ર્યમ્બકેણ સ મુચ્યતે ।
સર્વેભ્યોહ્યપિ પાપેભ્યઃ સ મુક્તો મોચયન્પુરા ॥ ૨૬॥

સ જીવન્ શિવતામેતિ સાક્ષાદ્રુદ્રસમો ભવેત્ ।
નિત્યાશુચિરયં દેહો ભસ્મના શુચિ(શૌચ)ભાક્ ભવેત્ ॥ ૨૭॥

ભસ્મૈતચ્ચ વિહાયૈવમન્યપુણ્ડ્રધરો યદિ ।
મુક્તિં વિન્દેત ચેત્તસ્માત્સાગરઃ સમ્પ્લવિષ્યતિ ॥ ૨૮॥

વિષપાનેન નિત્યત્વં યદિ વિન્દેત માનવઃ ।
ભસ્મસ્નાનવીહીનોયઃ સ ભવેન્માયયા વૃતઃ ॥ ૨૯॥

યો ભસ્મસ્નાનયુક્તો ભવતિ સુરનરો સ દ્વિજો વાઽધમો વા ।
નૈવાન્યદ્ભગવત્પ્રમોદજનકં જ્ઞાનં મહત્પ્રાપ્નુયાત્ ॥ ૩૦॥

યો ભસ્માભ્યક્તદેહો ભવતિ જનિજરાનાશપાપાદ્વિહીનઃ
પાપૈ(હિત્વા)સ્તાપજદુઃખભાગનિકરં જ્ઞાનં મહદ્વિન્દતિ ॥ ૩૧॥

ભુક્ત્વા સૌખ્યમતીવ શઙ્કરગણશ્રેષ્ઠઃ સુરમ્યાકૃતિઃ ।
ભૂયાદેવ મહાપ્રભાવસહિતો વિપ્રઽથ મુક્તો ભવેત્ ॥ ૩૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં ભસ્મમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૧ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 11 . vAvRRittashlokAH ..

Notes:
Ṛṣi Kaśyapa ઋષિ કશ્યપ delivers Upadeśa ઉપદેશ (to Garuḍa ગરુડ) about BhasmaMāhātmyam ભસ્મમાહાત્મ્યમ્.
He initiates by speaking about the Five Names of Bhasma i.e. BhasmaPañcanāmāni ભસ્મપઞ્ચનામાનિ viz., Vibhūti વિભૂતિ, Bhasita ભસિત, Bhasma ભસ્મ, Kṣāra ક્ષાર, Rakṣā રક્ષા, and explains the meaning of each name.

Proofread by Ruma Dewan

*Rishikashyapaproktam Bhasmamahatmyam*
pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*